# Shri Chidambareshvaravandana Stava

# श्रीचिदम्बरेश्वरवन्दनस्तवः

## Document Information

Text title : Shri Chidambareshvaravandana Stava

File name : chidambareshvaravandanastavaH.itx

Category : shiva

Location : doc_shiva

Author : vyAghrapAdamunIndra

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 11, 2022

*sanskritdocuments.org*

# श्रीचिदम्बरेश्वरवन्दनस्तवः

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ १॥

वन्दे सर्वजगद्विहारमतुलं वन्दे करित्वग्धरं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे पर्वतकन्यकार्धवपुषं वन्दे परं चिन्मयं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ २॥

वन्दे व्योमसभापतिं नटपतिं वन्देऽर्कदन्तापहं
वन्दे निर्मलमादिभूतमनिशं वन्दे मखध्वंसिनम् ।
वन्दे नित्यमगेन्द्रजाप्रियकरं वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ३॥

वन्दे भूरथमम्बुजाक्षविशिखं वन्दे त्रयीवाजिनं
वन्दे शैलशरासनं फणिगुणं वन्देऽब्धितूणीरकम् ।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ४॥

वन्दे पञ्चमुखाम्बुजं त्रिणयनं वन्दे ललाटेक्षणं
वन्दे व्योमकचं जटासुमकुटं वन्देऽब्जगङ्गाधरम् ।
वन्दे मारहरं त्रिपुण्ड्रनिटिलं वन्देऽष्टमूर्त्यात्मकं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ५॥

वन्दे राजतपर्वताग्रनिलयं वन्दे सुराधीश्वरं
वन्दे निर्गुणमप्रमेयममलं वन्दे यमद्वेषिणम् ।
वन्दे कुण्डलिराजकुण्डलधरं वन्दे सहस्राननं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ६॥

वन्देऽनन्तरविप्रकाशमगुणं वन्देऽन्धकस्यान्तकं
वन्दे पद्मजविष्णुगर्वकुलिशं वन्दे दयाम्भोनिधिम् ।
वन्दे चित्सभमीश्वरं सुरनुतं वन्दे त्रिमूर्त्यात्मकं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ७॥

वन्देऽपस्मृतिशिक्षकं विषहरं वन्दे मृडं धूर्जटिं
वन्दे विप्रवरैस्सुपूजितपदं वन्दे भवोत्तारकम् ।
वन्दे धर्ममुखार्थदं श्रुतिनुतं वन्दे गुरूणां गुरुं
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥ ८॥

शार्दूलाङ्घ्रिमहर्षिणा विरचितं सङ्कीर्तयेद्वन्दन-
स्तोत्रं तद्गतनामभिर्यजति यश्शम्भुं सभायाः पतिम् ।
सन्ध्यासु प्रतिवासरं सुनियतो धर्मादि सत्सम्पदो
लब्ध्वेहेन्दुकलाधरस्य सचिवो भूत्वा स च क्रीडति ॥ ९॥

इति श्रीव्याघ्रपादमुनीन्द्रविरचितः श्रीचिदम्बरेश्वरवन्दनस्तवः सम्पूर्णः ।

(Verses 1-5 follow shivastutiH vande shivaM
Rest differ so this may be included as a separate. )

Proofread by Aruna Narayanan

*Shri Chidambareshvaravandana Stava*

pdf was typeset on July 11, 2022

Please send corrections to *sanskrit@cheerful.com*